# Acharya Navaratnamalika StavaH

# આચાર્યનવરત્નમાલિકાસ્તવઃ

## Document Information

Text title : Acharya Navaratnamalika StavaH

File name : AchAryanavaratnamAlikAstavaH.itx

Category : deities_misc, gurudev, nava

Location : doc_deities_misc

Author : rAmasvAmishAstri

Proofread by : Ravi Venkatraman

Description/comments : Bhakta Kusumanjali Handful of Devtional Flowers on the Occasion of the Shri Chandrashekara Nakshatramahotsava (1912-1938) of Sri Chandrasekhara Bharati Swami of Sringeri

Latest update : October 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2021

*sanskritdocuments.org*

# આચાર્યનવરત્નમાલિકાસ્તવઃ

યસ્ય સ્મરણમાત્રેણ પાપૌઘઃ શૂન્યતાં વ્રજેત્ ।
જ્ઞાનપદ્મસ્ય સૂર્યો યઃ શઙ્કરો નઃ પ્રસીદતુ ॥ ૧॥

સંસારસર્પદષ્ટાનાં મહાજાઙ્ગલિકો ગુરુઃ ।
અવતીર્ણો ભિષઙ્નાથઃ શઙ્કરો નઃ પ્રસીદતુ ॥ ૨॥

ચિન્મયાનન્દમૂર્તિર્યઃ સંસારાર્ણવતારકઃ ।
મહાકારુણિકો યોગી શઙ્કરો નઃ પ્રસીદતુ ॥ ૩॥

યદ્વાગ્ગઙ્ગાપ્રવાહેણ પૂતાઃ સ્યુઃ પામરા જનાઃ ।
ભસ્મીકૃતાસ્તુ કામાગ્ન્યા શઙ્કરો નઃ પ્રસીદતુ ॥ ૪॥

નષ્ટમાર્ગાન્ભવાટવ્યાં દુઃખપૂર્ણાશ્ચ વિહ્વલાન્ ।
માર્ગબન્ધુઃ સદા પાતિ શઙ્કરો નઃ પ્રસીદતુ ॥ ૫॥

દુઃખદ્વારપિધાનં યઃ શિષ્યાણાં વિદિતાત્મનામ્ ।
પ્રેમ્ણા કરોતિ સતતં તં વન્દે લોકશઙ્કરમ્ ॥ ૬॥

દૃષ્ટ્યૈવ પાવયન્તીં કરુણાતટિનીં સદૈવ પરિપૂર્ણામ્ ।
વરતુઙ્ગોત્તુઙ્ગઝરીં શરણં કરવાણિ દેશિકેન્દ્રસ્ય ॥ ૭॥

જ્ઞાનદં કરુણાકરં બુધસેવિતં મુનિપુઙ્ગવં
    શારદાવદનામ્બુજં સ્મિતશોભિતં સ્તુતિભાનુના ।
ચારુણા સુવિકાસયન્તમઘૌષધં ભવરોગિણાં
    ચન્દ્રશેખરમાશ્રયે કિં કરિષ્યતિ મેઽજ્ઞાતા ॥ ૮॥

ભક્તિઃ પૂર્ણા કરતલગતઃ કર્મશાસ્ત્રપ્રવાહો
    યોગસ્તીર્ણઃ સકલવિભવો મન્ત્રરાજપ્રયોગઃ ।
જ્ઞાનં સર્વે સકલસુખદં સર્વદા લબ્ધમેવ
    પ્રાપ્તો યસ્માત્પરમસુકૃતાદેશિકેન્દ્રપ્રસાદઃ ॥ ૯॥

રામસ્વામિસુધીહસ્તગુમ્ફિતાં રત્નમાલિકામ્ ।
અઙ્ગીકરોતુ કૃપયા ચન્દ્રશેખરભારતી ॥

ઇતિ કે. એસ્. રામસ્વામિશાસ્ત્રિણા વિરચિતઃ આચાર્યનવરત્નમાલિકાસ્તવઃ સમ્પૂર્ણઃ ।

(દિવાન્ બહદૂર-બિ. એ., બિ. એલ્.-ઇત્યાદિ બિરુદાલઙ્કૃતેન
કે. એસ્. રામસ્વામિશાસ્ત્રિણા વિરચિતઃ)
(Author: Brahmasri Diwan Bahadur K. S. Ramaswami
Sastrigal, B. A., B. L., Retired District Judge, Kumbakonam.)
A garland of nine verses depicting the Great
qualities of His Holiness Sii Chandrasekhara
Bharati and appealing to HiM to bless His devotees.

Proofread by Ravi Venkatraman

*Acharya Navaratnamalika StavaH*
pdf was typeset on October 17, 2021

Please send corrections to *sanskrit@cheerful.com*